त्यं गर्गा०यञ् । एकापत्ये प्रुंस्त्री०स्त्रियां ङीप् यलोपः ऐकी ।

**ऐक्षव** त्रि० इक्षोर्विकारः बिल्वा० अण् । इक्षुविकारे गुडादौ इक्षुविकारभेदाश्च इक्षुशब्दे ९०९ पृ० उक्ताः । "ऐक्षवं गुडवर्जितम्" "फलान्यगुडमैक्षवमिति" च स्मृतिः । २मद्यभेदे च । "पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् । माक्षिकं टाङ्कमाध्वीकमैरेयं नारिकेलजम् । समानानि विजानीयान्मद्यान्येकादशैव तु । द्वादशन्तु सुरामद्यं सर्व्वेषामधमं स्मृतम्" पुलस्त्यः । मद्यान्येकादशेत्युक्तिः अधिकदोषार्था अन्येषामपि मद्यानां मदनपालेन दर्शितत्वात् । प्रसङ्गात् तान्यत्र गुणसहितानि दर्श्यन्ते । "मद्यं हाला सुरा शुण्डा मदिरा वरुणात्मजा । इरा गन्धोत्तमा कल्या देवसृष्टा च वारुणी । मद्यं पित्तकरं प्रायं सरं रोचनदीपनम् । विदाहि रूक्षविस्रं तु तीक्ष्णं वातकफापहम् । विधिना तु युतं पीतं तस्मादमृतसन्निभम् । अन्यथा कुरुते रोगानतिपीतं विषोपमम् । १द्राक्षोत्थमविदाहि स्याद्रक्तपित्तेषु शस्यते । बलपुष्टिकरं मद्यं रक्तार्शोहारि दीपनम् । माध्वीकल्पगुणं किञ्चित् २खार्जूरमनिलप्रदम् । तदेव विशदं रुच्यं श्लेष्मघ्नं कर्षणं लघु । शालिषष्टिकपिष्टादिकृतं मद्यं सुरा ३मता । सुरा गुर्वी बलस्तन्यपुष्टिमेदःकफप्रदा । ग्राहिणी शोथगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत् । पुनर्नवाशालिपिष्टैर्विहिता वारुणी ४मता । सुरावद्वारुणी लघ्वी पीनसाध्मानशूलनुत् । प्रसन्ना ५स्यात् सुरामण्डस्तस्मात्कादम्बरी ६घना । ७जङ्गलस्तदधः प्रोक्तो जङ्गलान्मेदको ८ऽधनः । पक्वसो ९जङ्गलः सारः सुराबीजन्तु किण्वकम् १० । प्रसन्नानाहगुल्मार्शश्छर्द्यरोचकवातजित् । दीपन्याध्मानहृत्कुक्षितोदशूलप्रणाशिनी । कादम्बरी गुरुर्वृष्या दीपनी वातकृत् सरा । जङ्गलः कफहृद्ग्राही शोफार्शोग्रहणीहरः । मेदको मधुरो बल्यस्तम्भनः शीतलो गुरुः । पक्वसो हृतसारत्वात् विष्टम्भी वातवर्द्धनः । किण्वकं वातशमनमहृद्यं दुर्ज्जरं गुरु । अक्षिकी ११सा सुरा या स्यादक्षतकशालितण्डुलैः । आक्षिकी पाण्डुशोथार्शःपित्तास्रकफकुष्ठनुत् । किञ्चिद्वातकरी रूक्षा दीपनी रेचनी लघुः । यवपिष्टकृतं मद्यं प्रोक्तं यवसुरा १२च सा । काकोलिकी १३हला चैषा मैरेयो १४धान्यजासवः । आसवस्य सुरायाश्च द्वयोरप्येकभाजनम् । साधनं तद्विजानीयात्मैरेयमुभयात्मकम् । क्वचित्तु धातकीपुष्पं गुडधान्याम्बुसाधितम् । गुर्वी यवसुरा रूक्षा स्वादिष्टश्च त्रिदोषकृत् । काकोली बृंहणी वृष्या दृष्टिमान्द्यप्रदा गुरुः । मैरेयं बृंहणं वृष्यं गुरु सन्तर्पणं सरम् । मद्यं सर्व्वरसं जातं मधूलकमुदीर्य्यते । मधूलकं १५गुरु स्वादु स्निग्धं शुक्रकफप्रदम् । शर्करो १६दीपनः स्वादुः पाचनो रोचनो लघुः । स्त्रीविलासकरो वातशोषवस्तिविकारनुत् । मध्वासवो १७लघूकृच्छ्रः कुष्ठमेहविषापहः । गौडो१८ऽग्निवर्द्धनो वर्ण्यो बलकृत्तर्पणः कटुः । तिक्तको बृंहणः स्वादुः रूक्षविस्मूत्रमारुतः । इक्षोः शीतरसः१९पक्वः सीधुः २०पक्वरसः स्मृतः । आमैः स एव विहितो बुधैः शीतरसो मतः । सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् । वातपित्तकरो हृद्यस्नेहनो रोचनो जयेत् । विबन्धमेहशोथार्शःशोषोदरकफामयान् । तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः । जाम्बवः क्षौद्रसम्भूतः जम्बूरसगुडोद्भवः । जाम्बवो २१बद्धनिष्यन्दः कषायोऽनिलकोपनः । अरिष्टासवसीधूनां गुणान् कर्म्माणि चादिशेत् । बुद्ध्वा यथास्वं संस्कारमवेक्ष्य कुशलो भिषक् । सान्द्रं विदाहि दुर्गन्धि विरसं क्रिमिसङ्कुलम् । अहृद्यं तरुणं रूक्षमुष्णं दुर्भोजने हितम् । अल्पौषधं पर्य्युषितमत्यर्थपिच्छलञ्च यत् । कफप्रकोपि तन्मद्यं दुर्जरञ्च विशेषतः । पित्तप्रकोपि बहुलं तीक्ष्णमुष्णं विदाहि च । अहृद्यं पेशलं पूतिक्लिन्नं विरसं गुरु । तथा पर्युषितं वापि विन्द्यादनिलकोपनम् । सर्व्वदोषैरुपेतन्तु सर्व्वदोषप्रकोपणम् । चिरस्थितं यातरसं दीपनं कफवातजित् । रुच्यं प्रसन्नं सुरभि सेध्यं सेव्यं मद्यासवम् । तस्मान्नैकप्रकारस्य मद्यस्य रसवीर्य्यतः । स सौक्ष्म्यादौष्ण्यवातत्वाद् विकाशित्वाच्च वह्निनुत् । समेत्य हृदयं प्राप्य धमनीरूर्द्ध्वमार्गगाः । विक्षुभ्येन्द्रियचेतांसि मदयत्याशु वीर्य्यतः । चिरेण श्लैष्मिके पुंसि पातनो जायते मदः । अचिराद्वातिके दृष्टः, पैत्तिके शीघ्रमेव च । नवं मद्यमभिष्यन्दि त्रिदोषजनकं सरम् । अरिष्टं बृंहणं दाहि दुर्गन्धि विशदं गुरु । जीर्णं तदेव रोचिष्णु क्रिमिश्लेष्मानिलापहम् । हृद्यं सुगन्धि सुगुणं लघु स्रोतोविशोधनम् । सात्विके गीतहास्यादि राजसे साहसादिकम् । तामसे निन्द्यकर्म्माणि निद्रादि कुरुते तदा । शुक्तं कफघ्नं तीक्ष्णोष्णं लघु रोचनपाचनम् । पाण्डु क्रिमिहरं रूक्षं भेदनं रक्तपित्तकृत् । गौडादिरसयुक्तानि मद्योक्तानि यानि च । यथापूर्वं गुरुतराण्यभिष्यन्दकराणि च ।